महा वि० का नाम

श्री वि० सं० महावि० रहीमपुर, खगड़िया।

9.00 दिनाङ्क- 10.12.2020

उपशास्त्री द्वितीय वर्ष

10.00 व्याकरण

भाग 94

11.00 विषय - बहुव्रीहि समास प्रकरणम्।

पूर्वान्तवत्वे तु परिशिष्टस्य सकारमात्रस्य अप्र-
12.00 भावात् लुक् न स्यादित्यत आह — 'चित्रा ज-
इति। गोशब्दस्य स्त्रीलिङ्गत्वात् तद्विशेषणत्वा-
1.00 च्चित्रेति स्त्रीलिङ्गनिर्देशः। 'प्रत्ययोत्तरपदयोश्च'
इति सूत्र भाष्यरीत्या 'अन्तरङ्गानपि विधीन् बहि-
2.00 रङ्गो लुग्बाधते' इति न्यायात् प्रागेव पूर्वस्मा-
दीर्घात् सुलुगिति भावः। 'चित्रगुरिति'। बहु-
3.00 व्रीहौ ह्रस्वत्वे चित्राशब्दस्य पुंवत्त्वमिति भावः
'रूपवद्भार्य इति'। रूपवती भार्या यस्येति
4.00 विग्रहः। अत्र उपसर्जनह्रस्वः। रूपवतीशब्दस्य
पुंवत्त्वम्। ननु चित्रा जरती गौर्यस्येति विग्रहे
5.00 कथं त्रिपद बहुव्रीहिः, 'सुप् सुपा' इत्येकत्वस्य
विवक्षितत्वादित्यत आह - 'अनेकोक्तिरिति'
6.00 शेष ग्रहणात् प्रथमान्तमिति लभ्यम्। एकस्य
प्रथमान्तस्य समासो नोपपद्यते, समास इत्य-
7.00 न्वर्थ संज्ञा विज्ञानात्। ततश्चार्थादनेक प्रथ-
मान्तमिति सिद्धे पुनरनेकग्रहणाद् द्विबहू-
नां प्रथमान्तानां बहुव्रीहिरिति भाष्ये स्पष्ट-
मिति भावः। अनेकेति। त्रिपदबहुव्रीहिमुदाहरति
'चित्रा जरतीगुः, जरतीचित्रागुर्वेति'। गां
प्रति चित्रात्वस्य जरतीत्वस्य च विशेषण-
NOTES त्वाविशेषाद् अन्यतरस्य 'सप्तमी विशेषणे
बहुव्रीहौ' इति पूर्वनिपात इति भावः। एवं
दीर्घेति 'दीर्घ तन्व्यौ जङ्घे यस्येति

Scanned with CamScanner

विग्रहः। उभयत्रापि पूर्वमध्यपदयोः पुंवत्त्वमाशङ्क्याह
– 'त्रिपद इति'। 'उत्तरपदस्येति'। समासचरमाव-
यवपदस्य उत्तरपदत्वात् तृतीयमेव पदमत्रोत्तरपदं
वाच्यम्। तत्परकत्वं च मध्यमपदस्यैव, न तु
प्रथमपदस्यापि, तस्य मध्यमेन पदेन व्यवधानादि-
त्यर्थः। ननु तर्हि मध्यमपदस्य पुंवत्त्वं कुर्वीरन्,
उत्तरपदपरत्वसत्त्वादित्यत आह 'द्वितीयमपि न
पुंवदिति'। पूर्वपदत्वाभावादिति। उत्तरपदेन पूर्वं
पदमाक्षेपाल्लभ्यते। समासप्रथमावयवपदमेव पूर्वपदम्
न तु मध्यमावयवपदमपीति भावः। ननु मध्यमा
पदापेक्षया प्रथमपदस्य पूर्वपदत्वमस्ति। मध्यमा
पदस्य च प्रथमपदापेक्षया उत्तरपदत्वमस्तीत्यत
आह 'उत्तरपदशब्दो हीति'। 'रूढ इति'। वैयाकरणा
समया निरूढ इत्यर्थः। 'इति वदन्तीति'। एवंप्रकारेण
केचिद्वदन्तीत्यन्वयः। तत्र प्रथमपदस्य त्रिपद
बहुव्रीहौ नास्ति पुंवत्त्वमिति बुध्यते, उत्तर
पदपरकत्वाभावात्। मध्यमपदस्य तु पूर्वपदत्वा
भावेऽप्यस्यैव पुंवत्त्वम्, 'स्त्रियाः पुंवत्' इत्यत्र
तु पूर्वपदस्याग्रहणात् अनुवृत्त्यभावाच्च, किन्तु
उत्तरपदे इत्यनेन ~~पुंवे~~ पूर्वपदस्य पुंवत्त्वमित्य-
र्थाद् गम्यत इति वक्तव्यम्। तदपि न सम्भव-
तीत्यत आह – 'नेह पूर्वपदमाक्षिप्यत इति'।
इह 'स्त्रियाः पुंवत्' – इत्यत्र उत्तरपदे इत्यनु-
वृत्तेन पूर्वपदं नाक्षिप्यते, नार्थाद्गम्यत
इत्यर्थः। 'ऋत इत्यत आह – आनङृत इत्यत्र
चेति। ऋदन्तानां द्वन्द्वे आनङ् स्यात् उत्तरपदे
इति तदर्थः। तत्र चतुर्णां द्वन्द्वे होतृपोतृनेष्टोद्गातारः'
इत्युपान्त्यस्य नेष्टुरानङुदाहृतः। 'समर्थः पद-
विधिः' इत्यत्र भाष्ये।

दिनेश प्रजापति,
एसोसियेट प्रोफेसर
(व्याकरण)

Sunday 29
NOTES
DEC
Scanned with CamScanner